# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय १०

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम् ।
अहं प्रसादयां चक्रे भ्रातरं प्रियकाम्यया ॥ १॥

दिष्ट्यासि कुशली प्राप्तो निहतश्च त्वया रिपुः ।
अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दनः ॥ २॥

इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् ।
छत्रं सवालव्यजनं प्रतीच्छस्व मयोद्यतम् ॥ ३॥

त्वमेव राजा मानार्हः सदा चाहं यथापुरा ।
न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् ॥ ४॥

मा च रोषं कृथाः सौम्य मयि शत्रुनिबर्हण ।
याचे त्वां शिरसा राजन्मया बद्धोऽयमञ्जलिः ॥ ५॥

बलादस्मि समागम्य मन्त्रिभिः पुरवासिभिः ।
राजभावे नियुक्तोऽहं शून्यदेशजिगीषया ॥ ६॥

स्निग्धमेवं ब्रुवाणं मां स तु निर्भर्त्स्य वानरः ।
धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह ॥ ७॥

प्रकृतीश्च समानीय मन्त्रिणश्चैव संमतान् ।
मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् ॥ ८॥

विदितं वो यथा रात्रौ मायावी स महासुरः ।
मां समाह्वयत क्रूरो युद्धाकाङ्क्षी सुदुर्मतिः ॥ ९॥

तस्य तद्गर्जितं श्रुत्वा निःसृतोऽहं नृपालयात् ।
अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः ॥ १०॥

स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः ।
प्राद्रवद्भयसन्त्रस्तो वीक्ष्यावां तमनुद्रुतौ ।
अनुद्रुतस्तु वेगेन प्रविवेश महाबिलम् ॥ ११॥

तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् ।
अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः ॥ १२॥

अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम् ।
बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥ १३॥

स्थितोऽयमिति मत्वा तु प्रविष्टोऽहं दुरासदम् ।
तं च मे मार्गमाणस्य गतः संवत्सरस्तदा ॥ १४॥

स तु दृष्टो मया शत्रुरनिर्वेदाद्भयावहः ।
निहतश्च मया तत्र सोऽसुरो बन्धुभिः सह ॥ १५॥

तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् ।
पूर्णमासीद्दुराक्रामं स्तनतस्तस्य भूतले ॥ १६॥

सूदयित्वा तु तं शत्रुं विक्रान्तं दुन्दुभेः सुतम् ।
निष्क्रामन्नेव पश्यामि बिलस्य पिहितं मुखम् ॥ १७॥

विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः ।
यदा प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥ १८॥

पादप्रहारैस्तु मया बहुशस्तद्विदारितम् ।
ततोऽहं तेन निष्क्रम्य यथा पुनरुपागतः ॥ १९॥

तत्रानेनास्मि संरुद्धो राज्यं मार्गयतात्मनः ।
सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥ २०॥

एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः ।
तदा निर्वासयामास वाली विगतसाध्वसः ॥ २१॥

तेनाहमपविद्धश्च हृतदारश्च राघव ।
तद्भयाच्च महीकृत्स्ना क्रान्तेयं सवनार्णवा ॥ २२॥

ऋश्यमूकं गिरिवरं भार्याहरणदुःखितः ।
प्रविष्टोऽस्मि दुराधर्षं वालिनः कारणान्तरे ॥ २३॥

एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ।
अनागसा मया प्राप्तं व्यसनं पश्य राघव ॥ २४॥

वालिनस्तु भयार्तस्य सर्वलोकाभयङ्कर ।
कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात् ॥ २५॥

एवमुक्तः स तेजस्वी धर्मज्ञो धर्मसंहितम् ।

वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ २६ ॥

अमोघाः सूर्यसङ्काशा ममेमे निशिताः शराः ।
तस्मिन्वालिनि दुर्वृत्ते पतिष्यन्ति रुषान्विताः ॥ २७ ॥

यावत्तं न हि पश्येयं तव भार्यापहारिणम् ।
तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः ॥ २८ ॥

आत्मानुमानात्पश्यामि मग्नं त्वां शोकसागरे ।
त्वामहं तारयिष्यामि कामं प्राप्स्यसि पुष्कलम् ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com